एष एव क्रमो दृष्टो गोसुवर्णादिहारिणाम् ।
विद्यापहारी मूकश्च गत्वा च नरकान् बहून् ॥
असमिद्धेऽग्नौ हुते च मन्दाग्निः संप्रजायते ।
परनिन्दाकृतघ्नत्वं परमर्म्मावघातनम् ।
नैष्ठुर्य्यं निर्घृणत्वञ्च परदारोपसेवनम् ।
परस्वहरणाशौचं देवतानाञ्च कुत्सनम् ॥
निकृत्य वञ्चनं नृणां कार्पण्यञ्च नृणां वधः ।
उपलक्षणादि जानीयात् मुक्तानां नरकादनु ॥"
प्रसङ्गात् स्वर्गागतलक्षणमप्याह ।
"दया भूतेषु संवादः परलोकं प्रतिक्रिया ।
सत्यं भूतहिता चोक्तिर्वेदप्रामाण्यदर्शनम् ॥
गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः ।
सत्क्रियाभ्यसनं मैत्री स्वर्गिणां लक्षणं विदुः ॥
अष्टाङ्गयोगविज्ञानात् प्राप्नोत्यात्यन्तिकं लयम् ॥"
इति गारुडे कर्म्मविपाकः २२६ अध्यायः ॥

नरकस्था, स्त्री, (नरके तिष्ठतीति । स्था + "सुपि स्थः ।" ३।२।४। इति कः ।) वैतरणी नदी । इति हेमचन्द्रः । ४ । १५२ ॥ निरयस्थिते, त्रि । यथा,
"नरकस्थोऽपि देहं वै न पुनस्त्यक्तुमिच्छति ॥"
इति श्रीभागवतम् ॥

नरकान्तकः, पुं, (नरकस्य तन्नाम्ना ख्यातस्यासुरस्य अन्तकः ।) विष्णुः । इति पुराणम् ॥ (यथा, मुकुन्दमालायाम् । ७ ।
"दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक ! प्रकामम् ।
अवधीरितशारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि ॥")

नरकामयः, पुं, (नरकः आमय इव यस्य ।) प्रेतः । इति शब्दरत्नावली ॥ (नरकरूप आमयः ।) निरयरोगश्च ॥

नरकीलकः, पुं, (नरेषु कीलक इव निन्द्यत्वात् ।) गुरुघ्नः । तत्पर्य्यायः । गुरुहा २ । इति हेमचन्द्रः । ३ । ५२२ ॥

नरगणः, पुं, (नरस्य गणो यस्मात् ।) नक्षत्रविशेषः । तज्जातजनः । यथा,—
"हस्तास्वातिमृगाश्विनीहरिगुरुः पौष्णानुराधादिति-
स्वार्द्रा रोहिणि चोत्तराणि भरणी पूर्ब्बाणि भानि त्रयम् ।
ज्येष्ठाश्लेषविशाखमूलवरुणानलमिचित्रामघाः
कथ्यन्ते मुनिभिर्यथाक्रमवशाद्देवा नरा राक्षसाः ॥"
इति दीपिका ॥
अस्य फलम् । यथा, कोष्ठीप्रदीपे ।
"मानुष्ये मृदुकर्म्मसक्तमनाः शीलान्वितो धीयुतः ॥"
(नराणां गणः ।) नरसमूहः ॥

नरङ्गः, पुं, (नृणाति प्रापयतीति । नॄ + "पतादेरङ्गच् ।" इति उणादिकोषटीकाधृतसूत्रात् अङ्गच् ।) वरण्डकः । नाराङ्गा इति भाषा ॥ (नुः पुरुषस्य अङ्गम् ।) मेहने, क्ली । इत्युणादिकोषः ॥

नरदेवः, पुं, (नरो देव इव ।) राजा । इति हलायुधः ॥ (यथा, हरिवंशे । ३२ । १२ ।
"रेतोधाः पुत्त्र उन्नयति नरदेव ! यमक्षयात् ॥")

नरनारायणौ, पुं, (नरश्च नारायणश्च तौ ।) ऋषिविशेषौ । तावेव श्रीकृष्णार्ज्जुनौ सम्भूतौ । इति महाभारतम् ॥ (यथा, देवीभागवते । ४ । ५ । १३ ।
"नरनारायणौ चैव चेरतुस्तप उत्तमम् ।
प्रालेयाद्रिं समागत्य तीर्थे बदरिकाश्रमे ॥")
तयोरुत्पत्तिर्यथा,—
"अथ चिन्तयतस्तस्य स्वान्तं गत्वा जनार्द्दनः ।
तत् सर्व्वं ज्ञापयामास वराहवपुषो हितम् ॥
ततो देहपरित्यागं कर्त्तुं समभवद्यदा ।
तदा दंष्ट्राग्रघातेन नरसिंहं महाबलम् ॥
शरभो भगवान् भर्गो द्विधा मध्ये चकार ह ।
नरसिंहे द्विधाभूते नरभागेन तस्य तु ॥
नर एव समुत्पन्नो दिव्यरूपी महानृषिः ।
तस्य पञ्चास्यभागेन नारायण इति श्रुतः ॥
अभवत् स महातेजा मुनिरूपी जनार्द्दनः ।
नरो नारायणश्चोभौ हरिहेतू महामती ॥
ययोः प्रभावो दुर्द्धर्षः शास्त्रे वेदे तपःसु च ॥"
इति कालिकापुराणे २९ अध्यायः ॥
कल्पभेदे तौ धर्म्मपुत्त्रौ । यथा,—
"धर्म्मस्य दक्षदुहितर्य्यजनिष्ट मूर्त्त्यां
नारायणो नर इति स्वतपःप्रभावः ।
दृष्ट्वात्मनो भगवतो नियमावलोपं
देव्यस्त्वनङ्गपृतना घटितुं न शेकुः ॥"
इति श्रीभागवते । २ । ७ । ६ ॥
(अनयोर्विशेषविवरणन्तु देवीभागवते ४ स्कन्धस्य ५ अध्यायमारभ्य द्रष्टव्यम् ॥)

नरपतिः, पुं, (नरान् पातीति । पा + डतिः । नराणां पतिर्वा ।) राजा । इति शब्दरत्नावली ॥ (यथा, रघुः । २ । ७५ ।
"नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्टं लोकपालानुभावैः ॥")

नरप्रियः, पुं, (नराणां प्रियः ।) नीलवृक्षः । इति राजनिर्घण्टः ॥ नरस्य प्रियवस्तुनि, त्रि ॥

नरभूः, स्त्री, (नराणां मनुष्याणां भूर्भूमिः ।) भारतवर्षः । इति त्रिकाण्डशेषः ॥ नरोत्पत्तिश्च ॥

नरभूमिः, स्त्री, (नराणां मनुष्याणां भूमिः ।) भारतवर्षः । इति शब्दरत्नावली ॥

नरमानिनी, स्त्री, (नरं पुरुषमिव मन्यते इति । मन + णिनिः + ङीप् ।) श्मश्रुयुक्तनारी । इति त्रिकाण्डशेषः ॥

नरमानिका, स्त्री, (नरं मन्यते या । मन + ण्वुल् । टापि अत इत्वम् ।) नरमानिनी । इति शब्दरत्नावली ॥

नरमाला, स्त्री, (नराणां तन्मुण्डानां माला ।) मनुष्यमुण्डमाला । यथा, मार्कण्डेये । ८७ । ६ ।
"विचित्रखट्वाङ्गधरा नरमालाविभूषणा ॥"

नरमालिनी, स्त्री, (नरस्येव माला केशसमूहो मुखेऽस्त्यस्या इति । इनिः + ङीप् । यद्वा, नरमानिनी प्रयोगानुरोधात् निपातनेन नस्य लत्वम् ।) श्मश्रुयुक्तनारी । इति हेमचन्द्रः । ३ । १९५ ॥ (नरस्य तन्मुण्डस्य मालास्त्यस्या इति ।) नरमालायुक्ता ॥

नरमेधः, पुं, (मिध हिंसायाम् + भावे घञ् । नराणां पुरुषाणां मेधो हिंसनं यत्र ।) नरवधात्मकयज्ञविशेषः ॥ (शुक्लीय वाजसनेयसंहितायाम् ३०—३१ अध्याययोर्द्दर्शितः । तत्र अधिकार्य्यादिकं ३० अध्याये वेददीपे उक्तम् । यथा,—
"ब्राह्मणराजन्ययोरतिष्ठाकामयोः पुरुषमेधसंज्ञको यज्ञो भवति । सर्व्वभूतान्यतिक्रम्य स्थानमतिष्ठा । चैत्रशुक्लदशम्यामारम्भः । अत्र त्रयोविंशतिर्दीक्षा भवन्ति द्वादशोपसदः पञ्च सुत्या इति चत्वारिंशद्दिनैः सिध्यति । अत्र यूपैकादशिनी भवति एकादशाग्निषोमीयाः पशवो भवन्ति तेषाञ्च प्रतियूपं मध्यमे वा यूपे यथेच्छं नियोजनम् । आज्येन सकृद्गृहीतेन देव सवितरिति प्रत्यृचं तिस्र आहुतीराहवनीये जुहोति ॥") स तु कलौ वर्ज्जनीयः । यथा,—
"समुद्रयात्रास्वीकारः कमण्डलुविधारणम् ।
द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥
देवरेण सुतोत्पत्तिर्म्मधुपर्के पशोर्व्वधः ।
मांसादनं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ॥
दत्तायाश्चैव कन्यायाः पुनर्दानं वरस्य च ।
दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकौ ॥
महाप्रस्थानगमनं गोमेधश्च तथा मखः ।
इमान् धर्म्मान् कलियुगे वर्ज्ज्यानाहुर्म्मनीषिणः ॥"
इत्युद्वाहतत्त्वे बृहन्नारदीयम् ॥

नरवाहनः, पुं, (नरो वाहनं यस्य । "क्षुभ्नादिषु च ।" ८ । ४ । ३९ । इति न णत्वम् ।) कुवेरः । इत्यमरः ।१।१।७२ ॥ (यथा, रघुः । ९ । ११ ।
"विजयदुन्दुभितां ययुरर्णवा
घनरवा नरवाहनसम्पदः ॥"
नृपतिविशेषः । यथा, राजतरङ्गिण्याम् । ५ । २१३ ।
"सोऽनुगैः सह निर्दोषं जघान द्रोहशङ्कया ।
शूरं दार्व्वाभिसारेशं शर्व्वर्य्यां नरवाहनम् ॥")
पुरुषयानविशिष्टे, त्रि ॥ (यथा, महाभारते । ३ । ८९ । ५ ।
"जज्ञे धनपतिर्यत्र कुवेरो नरवाहनः ॥")

नरविष्वणः, पुं, (नरं विष्वणति भक्षयतीति । वि + स्वन + अच् ।) राक्षसः । इति त्रिकाण्डशेषः ॥

नरसारः, पुं, (नरवत् शुद्धः सारो यत्र ।) वणिग्द्रव्यविशेषः । नौसादर इति निशादल इति च भाषा । तस्य पर्य्यायः । यथा, रत्नमालायाम् ।
"दिदलो गोमकः पिण्डो वोलो गन्धरसो रसः ॥"
तस्य शुद्धिर्यथा,—
"नरसारो भवेच्छुद्धश्चूर्णतोये विपाचितः ।
दोलायन्त्रेण यत्नेन भिषग्भिर्योगसिद्धये ॥"
इति सारचन्द्रिका ॥